हिमसंस्कृतवार्ता:

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-5 ■ वर्ष-4 ■ अङ्क-24 | 1 | नवम्बर 24, 2024 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## पञ्चाङ्गम्

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्दः ५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् मार्गशीर्षकृष्णाष्टमी तिथिः मार्गशीर्ष ०८ प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशस्य शिमला- रेल- स्थानके पैनोरमिककोचस्य अन्तिमपरीक्षणं सम्पन्नम्



4 उत्तराखण्डे राज्यस्तरीयानां संस्कृतछात्र-प्रतियोगितानां भव्यशुभारम्भः



5 उत्तरकाण्डम्!(त्रिचत्वारिंशः सर्गः)रामस्य समीपं सारमेयस्य गमनम्।(तृतीयः खण्डः)



## सुभाषितम्

**खलानां कण्टकानां च द्विविधैव प्रतिक्रिया।**
**उपानन्मुखभङ्गो वा दूरतो वा विसर्जनम्।।**

अर्थात्- दुष्ट मनुष्य और कांटे से दो ही तरीकों से बचा जा सकता है। या तो इन्हें जूतों से उन के मुँह पर प्रहार करना चाहिए या फिर उन्हें देखकर दूर से ही अपना रास्ता बदल लेना चाहिए।

## हिन्दीभाषा लक्षाधिकैः जनैः सह संवादं कर्तुं प्रमुखमाध्यमं वर्तते-इयान फिलीप्स्



हिमसंस्कृतवार्ताः । संयुक्तराष्ट्रस्य वार्ता सञ्चारमाध्यमस्य निदेशकः इयान फिलीप्स् उक्तवान् यत् ते शान्ति- मानवाधिकार-सततविकास-वातावरण-लिङ्गः-सम्बद्धेषु विषयेषु लक्षितदर्शकेभ्यः हिन्दीभाषायां संवादं कर्तुं प्रतिबद्धाः सन्ति। व्हाट्सऐप इत्यत्र हिन्दीभाषायाम् एका वाहिनी अपि आरप्स्यते इति योजना वर्तते। हिन्दीदिवससमारोहे असौ अवदत् यत् हिन्दीभाषा लक्षाधिकैः जनैः सह संवादं कर्तुं प्रमुखमाध्यमं वर्तते। समारोहे बीरेन्द्र प्रसाद-बैश्य इत्येतस्य नेतृत्वे भारतीयसंसद् सदस्यानाम् एकं प्रतिनिधिमण्डलं नैकेषां देशानां राजदूताः च भागं गृहीतवन्तः ।

## भारतीयजनतापक्षस्य नेतृत्वे महायुति-गठबन्धनस्य महाराष्ट्रे अकल्पनीयविजयश्री



हिमसंस्कृतवार्ताः। महाराष्ट्रे भारतीयजनता-पक्षस्य नेतृत्वे महायुतिगठबन्धनस्य भूस्खलितविजयः प्राप्तः। द्विशताधिकानि आसनानि जित्वा गठबन्धनेन इतिहासः निर्मितः अस्ति तत्रैव झारखण्ड मुक्ति मोर्चा इत्यस्य नेतृत्वे पुनः झारखण्डराज्ये इंडी गठबंधनसरकारस्य गठनं जातम् महाराष्ट्रे २८८ सदस्यीयविधानसभानिर्वाचने अद्यावधि प्राप्तेषु परिणामेषु भारतीयजनतापक्षः १२३ आसनानि प्राप्तवान्, ०९ आसनानि च अग्रणीः अस्ति। शिवसेना-एसएचएस ५४ आसनानि जित्वा ०३ आसनानि अग्रणी अस्ति। राष्ट्रवादी काङ्ग्रेसपक्षः ३९ आसनानि प्राप्तवान् अस्ति, ०२ आसनानि च अग्रणी अस्ति । शिवसेना-उद्धव बालासाहेब ठाकरे २० आसनानि प्राप्तवन्तः। काङ्ग्रेसपक्षः १२ आसनानि प्राप्तवान् अस्ति, ०४ आसनानि च अग्रणी अस्ति । राष्ट्रवादी काङ्ग्रेसपक्ष-शरदपवारः १० आसनानि प्राप्तवान्

### महाराष्ट्रस्य जनानां आभारं प्रकटितवान् प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्री नरेन्द्रमोदी महाराष्ट्र विधानसभा निर्वाचने एनडीए इत्येतत् प्रति ऐतिहासिक-जनादेशं प्रदातुं महाराष्ट्रस्य जनानां विशेषतः युवकानां महिलानां च कृते आभारं प्रकटितवन्तः। तेनोक्तं यत् अयं स्नेहः अद्वितीयो वर्तते। एकस्मिन् सामाजिकसञ्चार पटले श्रीमोदिना लिखितं यत् राज्ये विकास-सुशासनयोः विजयं सञ्जातम्। प्रधानमन्त्री झारखण्डस्य जनेभ्यः भाजपेति दलं प्रति समर्थनं प्रदातुं ज्ञापितवान् उक्तवान् च यत् दलं सर्वदा जनानां कृते राज्यस्य हिताय च कार्यं करिष्यति।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp number

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र. पत्रव्यवहारसङ्केतः- १७७१११

## क्रिएटिव माइण्ड्स-ऑफ्-टुमॉरो इत्येतस्याः प्रतियोगितायाः समापनम्

हिमसंस्कृतवार्ताः। पञ्चपञ्चाशत्तमे अन्ताराष्ट्रिय चलचित्र महोत्सवे क्रिएटिव माइण्ड्स-ऑफ्-टुमॉरो इत्येतस्याः प्रतियोगितायाः समापनम् अत्युत्साहेन सञ्जातम्। एकं लघुचलचित्रं निर्माणार्थं पञ्चदलेषु विभाजितेभ्यः शतप्रतिनिधभ्यः अष्टचत्वारिंशत् होरा पर्यन्तं समयः आसीत्। अस्मिन् वर्षे अस्याः प्रतियोगितायाः विषयासीत्- प्रौद्योगिक्याः युगे सम्बन्धम्। महोत्सवे प्रतिनिधियः चलचित्रोद्योगस्य जनान् मिलित्वा समृद्धम् अनुभवं प्राप्तवन्तः ।

## संविधानदिवसे नवदिल्ल्यां पदयात्रायाः नेतृत्वं करिष्यति केन्द्रीययुवप्रकरण-खेल-मन्त्री

केन्द्रीययुवप्रकरण-खेल-मन्त्री डॉ. मनसुख-माण्डविया अस्मिन् मासे पञ्चविंशति-दिनाङ्के संविधानदिवसम् आमानयितुं नवदिल्ल्यां पदयात्रायाः नेतृत्वं करिष्यति। अस्याः पदयात्रायाः विषये वर्तते मम संविधानं, मम स्वाभिमानः। अस्याः पदयात्रायाः उद्देश्यं वर्तते संवैधानिकमूल्यानां संवर्धनं, संविधानस्य प्रस्तावना-विषये तथा लोकतन्त्रस्य सिद्धान्तविषये युवकेषु जागरूकता-प्रसारणम्। अस्यां पदयात्रायां केन्द्रीय-मन्त्रिणः, सांसदाः. अन्यगणमान्यजनाश्च सम्मिलिताः भविष्यन्ति इति आशास्यते।



## आगामि पञ्चदिवसपर्यन्तं देशस्य अधिकतरभागेषु न्यूनतम- तापमाने अधिकपरिवर्तनं न भविष्यति

ऋतुविभागेन अनुमानितं यत् अण्डमान-निकोबार द्वीपसमूहस्य केषुचित् स्थलेषु अद्य यावत् अतिवृष्टिः भविष्यति। विभागेन सम्भावना व्यक्तीकृता यत् केरलस्य माहे इत्यत्र केषुचित् स्थानेषु निम्नवृष्टिः भविष्यति। हिमाचलप्रदेश-उत्तराखंड-पंजाब-हरियाणा-चण्डीगढ-दिल्ली इत्येतेषां नगराणां केषुचित् स्थलेषु रात्रौ अत्यन्त धूमिका भवितुं शक्यते। विभागेन अनुमानितं यत् दिल्ल्यां राष्ट्रियराजधानीक्षेत्रे च आगामि द्वि-त्रि-दिवस पर्यन्तम् अहर्निशं धूमिका नीहारं च भविष्यति। विभागनुसारेण आगामि पञ्चदिवस पर्यन्तं देशस्य अधिकतर भागेषु न्यूनतम- तापमाने अधिकपरिवर्तनं न भविष्यति ।

## मल्लयुद्ध-प्रतिस्पर्धायां भारतेन विजितानि सप्तपदकानि

हिमसंस्कृतवार्ताः मल्लयुद्ध-क्रीडायां आर्मेनिया-देशस्य येरेवन नगरे विश्व सैन्य-मल्लयुद्ध-प्रतिस्पर्धायां भारतेन सप्तपदकानि विजितानि येषु त्रीणि स्वर्णपदकानि, एकं रजतपदकं, त्रीणि कांस्यपदकानि च सम्मिलितानि सन्ति। महिलानां षट्सप्तति कि.ग्रा. मिते वर्गे रीतिका हुड्डा. महिलानां पञ्चपञ्चाशत् कि.ग्रा. मिते वर्गे ज्योति सिहाग, तत्रैव पुरुषवर्गाणां चतुःसप्तति कि.ग्रा. मिते वर्गे जयदीपः च सम्मिलिताः सन्ति। पुरुषाणां सप्तति-कि.ग्रा. फ्रीस्टाइल इत्येतस्मिन् वर्गे सुबेदार शरवन् रजतपदकं प्राप्तवान्। कांस्यपदकविजेतृषु पुरुषाणां सप्तपञ्चाशत् कि.ग्रा. फ्रीस्टाइल वर्गे शुभमः पुरुषाणां नवसप्तति कि.ग्रा. फ्रीस्टाइल वर्गे चन्द्रमोहनः



महिलानां अष्टषष्टिः कि.ग्रा. वर्गे प्रियंका च सम्मिलिताः सन्ति। भारतेन अस्मिन् वर्षे प्रथमवारं विश्व- मल्लयुद्ध-प्रतिस्पधायां महिलादलं प्रेषितम्।

# हिमाचलप्रदेशस्य शिमला- रेल- स्थानके पैनोरमिककोचस्य अन्तिमपरीक्षणं सम्पन्नम्



[illegible] विमानचालनमन्त्रालयस्य दलस्य आध्यक्ष्ये शनिवासरे प्रातः शिमला- रेल- स्थानके पैनोरमिक- विस्ताडोम- रेलयानस्य अन्तिमं परीक्षणं कृतम्। शिमला स्थानकात् सप्त- कोचयुक्तं पैनोरमिकरेलयानं प्रातः दशोन- द्वादशवादने कालकां प्रति प्रस्थितम्। यद्यपि यात्रायाः नियतकालः सार्ध- एकादशवादनमासीत्, किन्तु तन्त्रवैषम्यात् रेलयानं विलम्बेन प्रस्थितम्। परीक्षणकाले रेलयानस्य वेगः २५ किलोमीटरं प्रति होरा एव स्थितः। एषः वेगः अन्येषां रेलयानानामपि अत्र सामान्यः अस्ति। रेलयानं नागरिकविमानमन्त्रालयस्य रेलबोर्डस्य च अधिकारिणाम् समक्षं परीक्षणं कृतम्। ज्ञायते यत् रेलपथमध्ये रेलयानं स्थगयित्वा निरीक्षणं करणीयम्। एतस्मिन्समीक्षणे च प्रमुखरेलसुरक्षायुक्तेन (Chief Commissioner Railway Safety- CCRS) मन्त्रालयं प्रति प्रतिवेदनं प्रेषयिष्यते। इदं परीक्षणं नवम्बरमासस्य चतुर्विंशतितमे दिनाङ्के समाप्तिं गमिष्यति। सीसीआरएस- प्रतिवेदनस्य प्राप्तेरनन्तरं रेलमन्त्रालयस्य पैनोरमिक विस्ताडोम- कोचस्य नियमिततया संचालनाय निर्णयः भविष्यति।

# सरदारवल्लभभाई पटेलवर्याय राष्ट्रमेव प्रथमम् आसीत्- आचार्यः ललितकुमार अवस्थी





**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** सरदारवल्लभभाईपटेलस्य 150तमे जयन्त्यवसरे सरदारपटेलविश्वविद्यालयः मंडी इत्यस्य इतिहासविभागेन भारतस्य एकीकरणे सरदारपटेलस्य भूमिका इति विषये एका संगोष्ठी समायोजिता। संगोष्ठ्यामस्यां विश्वविद्यालयस्य कुलपतिः आचार्य ललितकुमार अवस्थी मुख्यातिथिरूपेण उपस्थिताः आसन्। कार्यक्रमस्य अध्यक्षता आचार्यः राजेशकुमारशर्मा अधिष्ठाता, छात्र कल्याणम् अकरोत्। संगोष्ठीसंयोजकः डॉ. राकेशकुमारशर्मा सर्वेषां स्वागतं कुर्वन् अवदत् यत् अस्याः संगोष्ठ्याः उद्देश्यं सरदारपटेलस्य ऐतिहासिकयोगदानस्य स्मरणं स्वतंत्रभारतस्य निर्माणे च तस्य अद्वितीयभूमिकाम् अवगन्तुमस्ति। मुख्यातिथिः आचार्यः ललितकुमार अवस्थी इतिहास सोसायटीं अस्य आयोजनस्य कृते शुभकामनाः ददन् उक्तवान् यत् सरदारपटेलः न केवलं राजनेता अपि तु भारतस्य वास्तविकनिर्माता आसीत्। तस्य 'लौह पुरुषः' इति अभिधानं तस्य अद्वितीयस्य तेजसं दृढ़तां च प्रदर्शयति। अस्मिन्नवसरे मुख्यातिथिना प्रतिभागिभ्यो प्रमाणपत्राणि स्मृतिचिह्नानि च प्रदत्तानि। कार्यक्रमस्य अध्यक्षः आचार्यः राजेशकुमारशर्मा सरदारपटेलस्य आदर्शान् आत्मसातकर्तुं तस्य जीवनात् प्रेरणां च प्राप्तुम् आह्वानं कृतम्। इतिहासविभागस्य छात्राणां कृते प्रश्नोत्तरी- वाद- विवाद- भाषणप्रतियोगितानां च आयोजनं कृतम्। प्रतिभागिभिः सरदारपटेलस्य आदर्शान् स्वीकृत्य राष्ट्रनिर्माणे योगदानं दातुं प्रतिबद्धता व्यक्ता। कार्यक्रमसंयोजकः डॉ. राकेशकुमारशर्मा उक्तवान् यत् वाद-विवाद प्रतियोगितायां कैलाश- देवेंदरौ प्रथमः, स्मृति- गौरवौ द्वितीयः, आकृति- विक्रांतौ च तृतीयः आसन्। प्रश्नोत्तरीप्रतियोगितायां क्रमशः जतिन- सुदर्शना, युवराज- भुवनेश्वरी, गीतानंद- सपना च प्रथम- द्वितीय- तृतीयस्थानेषु आसन्। भाषणप्रतियोगितायां क्रमशः रीना- हुमा- सिमरन, प्रथम- द्वितीय- तृतीयस्थानेषु आसन्।

# हिमाचलप्रदेशे गृह- व्यावसायिकभवननिर्माणं अधिकं व्ययकारी अभवत्, मानचित्राणाम् अनुमोदनशुल्कं पञ्चगुणं पर्यन्तं वर्धितम्

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे नगरनिगमे गृहं, व्यावसायिकं भवनं वा निर्माणम् अधिकं व्ययकारी अभवत्। गृहं वा व्यावसायिकं भवनं निर्मातुं मानचित्रं अनुमोदनार्थं शुल्कं चत्वारि- पञ्चगुणं पर्यन्तं वर्धितः। नगरनिगमक्षेत्रे, टीसीपी विभागस्य च अधिकारक्षेत्रे नगरपञ्चायतानां च शुल्कं निश्चितं तथापि आर्थिकदृष्ट्या दुर्बलजनानां कृते शतवर्गमीटर (१०० वर्गमीटर) पर्यन्तं मानचित्रं शुल्करहितम् भविष्यति। टीसीपी विभागेन अधिसूचना प्रकाशिताः। गृहनिर्माणार्थं मानचित्राणाम् अनुमोदनशुल्कम्। अधिसूचनायां *चतुर्भिस्विपर्यन्तं* भूमौ गृहनिर्माणार्थं मानचित्रम् अनुमोदनाय पूर्वं पञ्चसहस्रं शुल्कं भवति स्म, इदानीं पञ्चदशसहस्रं षोडशसहस्रं वा शुल्कं भविष्यति। होटलं तथा अन्यव्यावसायिकनिर्माणस्य कृते मानचित्रम् अनुमोदनाय शुल्कम् अपि वर्धितम्। नगरनिगमस्य क्षेत्रे मानचित्रम् अनुमोदनाय प्रति वर्गमीटर *बिल्टप* क्षेत्रफलस्य अनुसारं शुल्कं चत्वारिंशत् रूप्यकाणि भविष्यति। पूर्वं अष्ट रूप्यकाणि इति शुल्कम् आसीत्।



व्यावसायिकक्रियायाः कृते शुल्कम् अष्टाशीतिः (८०) रूप्यकाणि प्रति वर्गमीटर भविष्यति। पूर्वं दश (१०) रूप्यकाणि शुल्कम् आसीत्। टीसीपी विभागस्य (प्लानिंग क्षेत्रे, विशेष क्षेत्रे च) गृहनिर्माणार्थं शुल्कं त्रिंशत् (३०) रूप्यकाणि भविष्यति, यत्र पूर्वं पञ्च (५) रूप्यकाणि शुल्कम् आसीत्। व्यावसायिकक्रियायाः कृते शुल्कं षष्टिः (६०) रूप्यकाणि प्रति वर्गमीटर भविष्यति। पूर्वम् अष्टरूप्यकाणि शुल्कम् आसीत्।

## इदानीं एसेंशियल सर्टिफिकेट (ईसी) अपि शुल्केन सह

व्यवसायिकजनाः उद्योगिनः च पूर्वं शुल्करहितं प्रदेयम् एसेंशियल सर्टिफिकेट (ईसी) इत्यस्य कृते अपि इदानीं शुल्कं दातव्यम्। उद्योगं तथा अन्यक्रियाः आरब्धुं पूर्वं ईसी आवश्यकम्।

| ईसी शुल्कम् प्लॉट वर्गमीटर | शुल्कम् (रूप्यकाणि) |
|---|---|
| २५०० पर्यन्तम्- | २५,००० |
| २५०० - १०,०००- | ५०,००० |
| १०,००० परम् - | १,००,००० |

# सहकारिता क्षेत्रस्य माध्यमेन कोटिशः कृषकाणां जीवनस्य गुणवत्तां वर्धयितुं केन्द्रप्रशासनं प्रतिबद्धम् - केन्द्रीय सहकारिता मन्त्री अमितशाहः




केन्द्रीय सहकारिता मन्त्री अमितशाहः प्रोक्तवान् यत् सहकारिता क्षेत्रस्य माध्यमेन कोटिशः कृषकाणां जीवनस्य गुणवत्तां वर्धयितुं केन्द्रप्रशासनं प्रतिबद्धम् अस्ति। नवदिल्ल्यां राष्ट्रिय सहकारी विकास- निगमस्य एकनवति-तमं सामान्य- परिषदः उपवेशनं सम्बोधयन् श्रीशाहः अवदत् यत् सहकारिता-आन्दोलन- माध्यमेन देशस्य नागरिकानां प्रशासनं प्रतिबद्धम् अस्ति। तेन प्रोक्तं यत् मोदी-प्रशासनं सहकारिता-संस्थानां - माध्यमेन देशम् आत्मनिर्भरं कर्तुं कार्यं कुर्वन् अस्ति।

## नीरज बिष्टेन निशा मेहरा इत्यनया च लब्धं विजेतृपदकम् रामनगर-महाविद्यालये वार्षिक-क्रीडासमारोहः सम्पन्नः।



हिमसंस्कृतवार्ताः- डॉ. मूलचन्द्रशुक्लः, रामनगरम्। पीएनजी- राजकीय- स्नातकोत्तर- महाविद्यालये द्विदिवसाभ्यामग्रेसरन्त्याः वार्षिकक्रीडायाः समापनं जातम्। तत्र नीरज बिष्टः छात्र प्रतियोगितायां, छात्रा चैम्पियनशिप निशा मेहरा इत्यनया च अर्जिता। छात्रवर्गे नीरज बिष्टः स्वर्णपदकद्वयेन रजतपदकत्रयेण च सहितं (मेडल) सर्वाधिक पदकानि अर्जितवान्। छात्रावर्गे निशा मेहराद्वारा स्वर्णपदकत्रयं रजतपदकद्वयं च विजित्य चैम्पियनशिप लब्धम्। द्वितीयदिवसे छात्रवर्गस्य 10000 परिमितं धावनप्रतियोगितायां प्रथमं स्थानं नीरज बिष्टः, द्वितीयं स्थानं गौरवः, तृतीयं स्थानं सञ्जयः सान्त्वनापुरस्कारं च अंशुमन कोहली प्राप्तवन्तः। 1500 परिमितं धावनप्रतियोगितायां प्रथमे स्थाने गौरव नेगी, द्वितीयस्थाने नीरज बिष्टः तृतीयस्थाने च अंशुमन कोहली आसन्। 100 मीटरपरिमितं धावनप्रतियोगितायां प्रथमस्थाने सावन नेगी, द्वितीयस्थाने सुमित बलोदी तृतीयस्थाने च ऋषभ कुमारः आसन्। छात्रावर्गे 1500 परिमिते धावने प्रथमं स्थानं मीना ,द्वितीयं स्थानं बेनिका आर्या तृतीयं स्थानञ्च लक्ष्मी जोशी लब्धवत्यः। 100 मीटरपरिमितं धावनस्पर्धायां प्रथमस्थाने भारती गिरी, द्वितीयस्थाने निशा मेहरा तृतीये स्थाने च बेनिका आर्या आसन्। छात्रवर्गस्य 4 चतुर्गुणित 400 रिले धावन- अन्तर्सङ्घाय प्रतिस्पर्धायां प्रथमे स्थाने तृतीयदलस्यस्य सुमितः, सावनः, राहुलः, अंकितश्च द्वितीयं स्थानम्, प्रथम दलस्यस्य नीरजः, गौरवः, संजयः, अंशुमनः, तृतीयं स्थानम्, चतुर्थदलस्य शैलेन्द्रः, यशदीपः, दिव्यांशुः, हिमांशुः च स्थानं लब्धवन्तः। छात्रावर्गस्य 4 चतुर्गुणित 400 रिले धावने अन्तर्सङ्घाय प्रतिस्पर्धायां प्रथमे स्थाने प्रथमदलस्य निशा, योगिता, अनामिका, भारती च आसन्। द्वितीयस्थानं द्वितीयदलस्य मीना, लक्ष्मी, बेनिका, ईशा अंशुमन च प्राप्तवन्तः। तृतीयस्थाने तृतीयदलस्य सोनाली, खुशी, निशा, कल्पना च आसन्। समस्तविजयीप्रतिभागिभ्यो मुख्यातिथिः प्राचार्यः प्रो. एम. सी. पाण्डेयः विशिष्ट- अतिथिः गणेशरावतमहोदयः कुलानुशासकः प्रो. एस. एस. मौर्यमहोदयश्च प्रमाणपत्राणि पुरस्कारान् च प्रदाय पुरस्कुर्वन्ति। अस्मिन् अवसरे मुख्यातिथिः प्रो. एम. सी. पाण्डेयः विद्यार्थिनामुत्साहवर्धनपूर्वकं शिक्षया सह क्रीडाप्रतियोगितास्वपि अहमहमिकया अग्रे वर्धनाय विद्यार्थिभ्यः प्रोत्साहयति। विशिष्टातिथिवर्यः विजेतृप्रतिभागिभ्यो वर्धापनानि प्रयच्छति। क्रीडाप्रभारी संयोजकश्च डॉ. योगेशचन्द्रः अतिथिभिस्सह समेषां कार्तज्ञं विनिवेदयति। कार्यक्रमस्य सञ्चालनं डॉ. अलका राजौरिया डॉ. डी. एन. जोशी च संयुक्तरूपेण कृतवन्तौ। निर्णायक- मण्डले क्रीडा- शारीरिकप्रशिक्षकः अजयसिंहः, जगदीश सिंहः, विनोदकुमारः सुशीलकुमारश्च आसन्। विविधस्पर्धासम्पन्नकरणाय महाविद्यालयपरिवारेण सह विशेषावदानं याः ये च दत्तवन्तः। यथा- डॉ. दीपक खाती, कुसुमगुप्ता, डॉ. विजय कुमारः, डॉ. सुरेश चन्द्रा, डॉ. मुरलीधर कापड़ी, आनन्द बल्लभ रिखाड़ी, गोविन्द मेवाड़ी, सुशीलकुमारः महेन्द्र आर्यश्च इत्यादयः।

## सिरमौररत्नपुरस्कारः २०२४ इत्योपलक्ष्ये विलक्षणयोगदानस्य कृते १११ विभूतिनां सम्मानम्




हिमसंस्कृतवार्ताः- डॉ. नरेन्द्र राणा। सिरमौरजनपदस्य गाताधारे आयोजिते सिरमौररत्नपुरस्कारः २०२४ इत्योपलक्ष्ये विभिन्नक्षेत्रेषु विलक्षणयोगदानस्य कृते १११ विभूतिनां सम्मानं कृतम्। अस्मिन् अवसरे कार्यक्रमस्य आयोजकः डॉ. बलवीरशर्मा उपस्थितानां सर्वेषाम् अतिथिनां हार्दिकं स्वागतं कृत्वा क्षेत्रे पर्यटनस्य प्रचारस्य आवश्यकतायाः उपरि बलं दत्तवान्। अस्मिन् कार्यक्रमे मुख्यातिथिरुपेण WWE इत्यस्य विश्वप्रसिद्धक्रीडकः दी ग्रेट खली इति नाम्ना प्रसिद्धः दिलीपसिंह राणा, सर्वोच्च- न्यायालयस्य वरिष्ठ- अधिवक्ता भारत- गौरव- सम्मानस्य चयनसमितेः अध्यक्षः डॉ. एच. सी. गनेशिया सहितं नैकाः गणमान्याः विभूतयः उपस्थिताः आसन्।

### चलचित्रवार्ताः

## कर्करोगेण सह युद्धं कुर्वती हिना खानः बिग बॉस इत्यस्मिन् कार्यक्रमे भागं गृहीतवती सलमानः अवदत् 1000% भवती शीघ्रं कुशलाः भविष्यति



हिमसंस्कृतवार्ताः - जगदीश डाभी (मुम्बई) दूरदर्शनस्य अभिनेत्री हिना खानः अद्यकाले कर्करोगेण सह युद्धं कुर्वती अस्ति। एतेषु कठिनेषु कालेषु अपि हिना बली स्थिता अस्ति। सा निरन्तरं चिकित्सां कुर्वती अस्ति, कार्यं च कुर्वती अस्ति। अधुना एव हिना एकस्मिन् फैशनप्रदर्शने दर्शनं दतवती । अधुना सा बिग बॉस इत्यस्मिन् कार्यक्रमे भागं गृहीतवती। बिग बॉस् इत्यस्य नूतनः प्रोमो-लघुपुटकम् आगतं यस्मिन् हिना खानः दृश्यते। अस्मिन् सप्ताहे 'वीकेंड का वॉर' इत्यस्मिन् श्रृंखलायां हिना दृश्यते। सलमानः प्रोमो पटल-मध्ये हिना खानस्य हार्दिकं स्वागतं करोति। स्वागतं कुर्वन् सलमानः वदति – कृपया स्वागतं कुरुत, वास्तविकजीवनस्य सेनानी हिना खान। तदनन्तरं हिना खानः कथयति यत्- अस्याः सुन्दरयात्रायाः मया सह यत् वस्तु नीतं तत् बलम् अस्ति। मया अतीव सुन्दरः टैगः इति प्राप्तः। शेरखान इत्येन सर्वं जगत् जानाति। हिनां श्रुत्वा सलमानः वदति- भवती सर्वदा योद्धा आसीत्, प्रत्येकं आव्हानं च युद्धं करोति। भवती सहस्रप्रतिशतं कुशलाः भविष्यति। सलमानस्य एतत् श्रुत्वा हिना अतीव भावुकः भवति।

## ओआरएस इत्यस्य जनकः डॉ. दिलीप महालनोबिसः

डॉ. दिलीप महालनोबिस इत्येते ओआरएस (ओरल रीहायड्रेशन सोल्यूशन) इत्यस्य जनकः। अद्य यदि कस्यापि अशक्तता प्रकटते, अतिसाररोगेण वा शरीरतः जलं न्यूनं भवति, तर्हि चिकित्सकाः ओआरएस ग्रहणं करणीयमिति वदन्ति। विपणिस्थले सुलभं लघुपुटके (लघुपत्रे) संकलितं द्रव्यं जले मिश्रयित्वा पानं कुर्वन्तः द्वे पञ्च वा क्षणेषु त्वरितं लाभं अनुभवामः। अद्य जगति सर्वत्र ओआरएस उपयोगः प्रचलति। अस्य ओआरएस-उपकरणस्य जनकः भारतीयचिकित्सकः आसीत्। पश्चिमबंगालप्रदेशे डॉ. दिलीप महालनोबिस इत्येते भारतीयबालरोगतज्ञः आसन्, ये अतिसाररोगस्य उपचाराय ओरल रीहायड्रेशन थेरपी-उपयोगे प्रसिद्धाः अभवन्। १९६०-तमस्य दशकस्य मध्यभागे कलकत्तानगरे जॉन्स हॉपकिन्स इंटरनॅशनल सेंटर फॉर मेडिकल रिसर्च एण्ड ट्रेनिंग इत्यत्र ते अतिसाररोगाणां विषये अनुसन्धानं कृतवन्तः। अस्मिन प्रकारे जगति कोटिशतानि जीवनानि रक्षन्तः तेषां वयस्य सप्ताशीत्युत्तरसप्तत्यधिके वर्षे कोलकत्तानगरे एका चिकित्सालये निधनं जातम्। **संकलितम् अनुवादितम् सुधा साठ्ये मुंबई**

# राज्यस्तरीयानां संस्कृतछात्र-प्रतियोगितानां भव्यशुभारम्भः







- **अकादम्या संस्कृतभाषायाः प्रचारं कर्तुं च षोडशमहोत्सवरूपेण प्रतियोगितायाः आयोजनं कृतम्।**
- **"संस्कृतशब्दान् जनसंगमेषु सञ्चाल्य संस्कृतं व्यवहारिकभाषारूपेण कर्तुम् आवश्यकम्""मदनकौशिकः"**

।। त्रयोदशजनपदस्य छात्राणां द्वादशप्रतियोगितासु उत्तमप्रस्तुतिः। प्रतियोगितायां कनिष्ठस्य वरिष्ठस्य च वर्गयोः प्रतियोगिता आयोजिता, यत्र प्रथमदिने अष्टप्रतियोगिताः पूर्णाः अभवन्। निर्णायकमण्डलेषु षोडशसंस्कृतविद्वांसः प्रतिभायाः मूल्यांकनं कृतवन्तः।।

उत्तराखण्डसंस्कृत-अकादमी शुक्रवासरे राज्यस्तरीय- संस्कृत- छात्रप्रतियोगिता आयोजयत्, यत्र मुख्यातिथिना विधायकेन पूर्वकेबिनेटमन्त्रिणा मदनकौशिकेन उद्घाटनं कृतम्। अस्मिन् महत्तमे अवसरे प्रो. प्रेमचन्द्रशास्त्री अध्यक्षतां कृतवान्। अतिविशिष्टातिथिस्वरूपेण डॉ. दिनेशचन्द्रशास्त्री कुलपतिः उत्तराखण्डसंस्कृतविश्वविद्यालयात् उपस्थितः आसीत्। अन्यतः विशिष्टातिथिरूपेण राष्ट्रपतिपुरस्कृतः ओमप्रकाशभट्टः, डॉ. पद्माकरमिश्रश्च कार्यक्रमे उपस्थितोभूत्। अकादम्याः सचिवेन डॉ. वाजश्रवा आर्येण उद्घोषितं यत् राज्यस्तरीयः संस्कृतमहोत्सवः षोडशतममहोत्सवरूपेण आयोजितोऽस्ति, यत्र विविधजनपदात् छात्राः विभिन्नविषयेषु भागं स्वीकृत्य प्रतिस्पर्धाः योजयन्ति। प्रतियोगितायाः उद्देश्यं संस्कृतभाषायाः संवर्धनं च द्वितीयराजभाषायाः महत्त्ववर्धनं इति व्याख्यायितम्।

विशिष्टातिथिना डॉ. ओमप्रकाशभट्टेन संस्कृतस्य प्रचारार्थे उत्तराखण्डसरकारेण नामपट्टिकायाः उल्लेखः कृतः, यत्र राजकीयकार्यालयेषु संस्कृतलेखनस्य आरम्भः अभवत्, परन्तु सर्वत्र कार्यालयेषु तस्य पालनं न अस्ति। सः उक्तवान् यत् संस्कृतप्रतियोगितायाः आयोजनं महाजनभवनस्य विशाले प्राङ्गणे सम्पन्नं यत्र हि सहस्रशः संलग्नाः, छात्राः, संस्कृतप्राध्यापकाः प्राध्यापिकाः, दलशिक्षकाः समुपस्थिताः च विद्यन्ते। सर्वैः संस्कृतस्य पुनरुज्जीवनस्य गौरवदायिनी क्षणमिति प्रमाणितम्। कुलपतिना दिनेशचन्द्रशास्त्रिणा उक्तं यत् संस्कृतमेव अस्माकं सभ्यतायाः परिचयकर्ता, विश्वे भारतीयः यशः संस्कृतभाषाद्वारा वृद्धिं गता। संस्कृतभारतीसंस्थायाः न्यासी-अध्यक्षेण प्रेमचन्द्रशास्त्रिणा संस्कृत- अकादम्याः राजभाषायाः कार्येषु विधायमानस्य प्रयासस्य वर्णनं कृत्वा विधायकमदनकौशिकस्य समये योगदानस्य च आयुर्वेदगुरुकुलस्य अन्वेषणं सह संस्कृतछात्राणां प्रवेशाय प्रशंसनं कृतम्। मुख्यातिथिना मदनकौशिकेन उक्तं यत्, भाषायाः प्रचाराय समाजेन सह सम्मिल्य संस्कृतं जनसंगमे स्थापनं कर्तव्यं। हरिद्वारे प्रारभ्यमाणमस्य कार्यस्य संस्कृतप्रवृत्तिः आरब्धा आसीत्। सम्पूर्णे समाजे संस्कृतशब्देषु प्रचलनं करणीयं यत्र संस्कृतव्यवहारिकभाषा रूपेण परिणमति। एषा प्रतियोगिता संस्कृतभाषायाः संवर्धनाय द्वितीयराजभाषायाः महत्त्ववर्धनाय आयोजिता। प्रथमदिनप्रतियोगितायाः १३ मण्डलानि ४५००० छात्राः ४००० शिक्षकाः भागं गृहीतवन्तः। अत्र कनिष्ठवर्गे वरिष्ठवर्गे च प्रतियोगिता आयोजिता। प्रथमदिने अष्टप्रतियोगिताः पूर्णाः अभवन्। निर्णायकमण्डलेषु षोडशसंस्कृतविद्वांसः मूल्यांकनेन निर्णयं कृतवन्तः। अत्र आयोजकयोजकः सहसंयोजकः खण्डसंयोजकाः च छात्रश्रेष्ठतायाः प्रोत्साहनं करणाय योगदानं दत्तंवन्तः। उत्तराखण्ड- संस्कृत- अकादम्याः संस्कृतभाषायाः प्रचाराय महत्त्वपूर्णं क्षणम् आरब्धम्। संस्कृतस्य समृद्धौ च तस्य भूमिकायाः यथार्थतया अमूल्यम् सिद्धिं प्रापयितुं, एषा प्रतियोगिता प्रेरणादायीरूपेण प्रमाणिता विद्यते।

# राहुल गांधी शिमलां प्राप्तः, प्रियंका-गांधी विजयोत्सवं आचर्य आगमिष्यति



हिमसंस्कृतवार्ताः - शिमला। काङ्ग्रेसदलस्य महासचिवः राहुलः गांधी चिरसायं शिमलां प्राप्तःन। सोनिया गान्धी, राहुलगान्धी च शिमलानगरम् आगतवन्तौ, अत्र प्रियङ्कागान्धी इत्यस्याः छराबड़ा-निवासस्थाने निवसतः च । सोनिया गान्धी गतसायं अत्र आगता आसीत्, तदनन्तरं राहुलगान्धी विलम्बेन रात्रौ आगतः इति कथ्यते। परिसरे पुलिसैः कठोरव्यवस्था कृता अस्ति।महाराष्ट्रे झारखण्डे च शनिवासरे निर्वाचनपरिणामाः प्राप्ताः, यत्र महाराष्ट्रे काङ्ग्रेसस्य महती विफलता अभवत्, झारखण्डे काङ्ग्रेसस्य कृते किञ्चिदाश्रयः अभवत्। एतादृशे सति एते नेतारः इतः निर्वाचनपरिणामेषु दृष्टिपातं कुर्वन्ति स्म । राहुलगान्धी सम्पूर्णदिनं स्वनेतृभिः सह दूरभाषे एव स्थितवान्, महत्त्वपूर्णं तु वायनाडतः प्रतियोगं कुर्वत्याः प्रियङ्कागान्धी इत्यस्याः निर्वाचनपरिणामः आसीत् । अस्मिन् उपनिर्वाचने प्रियङ्का गान्धी चतुर्लक्षाधिकमतैः विजयं प्राप्तवती, येन सह सोनिया गान्धी राहुलगान्धी च वार्तालापं कृत्वा अभिनन्दनं च कृतवन्तौ। इदानीं विजयोत्सवं कृत्वा प्रियङ्का गान्धी अपि शिमलानगरम् आगमिष्यति इति विश्वासः अस्ति । एतौ दिग्गजौ काङ्ग्रेसनेतारौ सम्पूर्णदिनं छराबड़ायां एव स्थितौ। राहुलगान्धी लोकसभायां विपक्षस्य नेता अस्ति। उभौ छराबड़ायां प्रियङ्कायाः गृहे निवसतः। सोनिया-राहुलः महाराष्ट्र-झारखण्ड-सहितेषु अन्येषु स्थानेषु आयोजितानां उपनिर्वाचनानां परिणामानां प्रतिक्रियाम् इतः एव गृह्णन्ति स्म । दलनेतृभिः सह दूरभाषेण चर्चा कृता। प्रियंकायाः विजयाय अपि अभिनन्दनं कृतवान् । प्रियंका वाड्रा वायनाडलोकसभासनतः निर्वाचने विशालान्तरेण विजयं प्राप्तवती अस्ति। एतत् गान्धीपरिवारस्य व्यक्तिगतं भ्रमणम् अस्ति। एतादृशे सति कस्मै अपि मेलनस्य समयः न दत्तः । यद्यपि प्रातःकाले केचन मीडिया-व्यक्तिः तत्र आगताः आसन् ये इच्छन्ति स्म यत् राहुलगान्धी तैः सह वार्तालापं कुर्यात्, परन्तु सः व्यक्तिगतभ्रमणं कृतवान् आसीत्, अतः सः केनापि सह वार्तालापं कर्तुं न शक्तवान्निर्धारितकार्यक्रमानुसारं सोनिया, राहुलगान्धी च प्रायः एकसप्ताहं यावत् शिमलानगरे तिष्ठतः इति कथ्यते। अखिलभारतीयकाङ्ग्रेससमितेः पूर्वाध्यक्षा सोनियागान्धी, लोकसभायां विपक्षनेता राहुलगान्धी च शिमलानगरे आगमनात् पूर्वमपि छराबड़ायां पुलिससुरक्षाव्यवस्थाः कठोरताम् अवाप्तवन्तः। प्रत्येकं कोणे कोणे च पुलिसबलानि नियोजितानि सन्ति। सोनिया गान्धी गतशुक्रवासरे दिल्लीतः चण्डीगढं प्रति विमानेन आगता। चण्डीगढतः सोनिया गान्धी मार्गेण शिमलानगरं प्राप्तवती । यदा तु राहुलगान्धी शुक्रवासरे अपराह्ने जयपुरतः चण्डीगढं प्राप्तवान्। चण्डीगढतः राहुलः अपि मार्गमार्गेण शिमलानगरम् आगत्य विलम्बेन रात्रौ छाराबड़ानगरं प्राप्तवान् । दिल्लीनगरे नित्यं वर्धमानं प्रदूषणं दृष्ट्वा शिमलानगरस्य शुद्धजलवायुस्थाने शान्तिक्षणं व्यतीतुं सोनिया गान्धी शिमलानगरम् आगता इति कथ्यते। तस्मिन् एव काले राहुलगान्धी अपि छराबड़ायाः शान्त-उपत्यकासु निर्वाचन-क्लान्तिं दूरं करिष्यति । महाराष्ट्रे झारखण्डे च निर्वाचनेषु सः बहु परिश्रमं कृतवान् । तथापि महाराष्ट्रे तेषां कृते महदाघातः अवश्यमेव अभवत् यतोहि अत्र भाजपा स्वयमेव सत्तां प्राप्तवती अस्ति। अत्र निर्वाचनप्रचारे बहवः बृहत् विषयाः आसन् किन्तु महाराष्ट्रस्य जनाः भाजपा-पक्षस्य समर्थनं कृतवन्तः। अत्र काङ्ग्रेसः अस्वीकृतः यस्य कारणेन राहुलगान्धिना उद्धृताः विषयाः अपि सर्वथा गौणाः अभवन् । अधुना राहुलगान्धी शिमलानगरे कतिपयदिनानि यावत् तिष्ठति।

# राज्यसर्वकारः महाविद्यालयानाम् श्रेणीं स्थापयितुं विचारयति - मुख्यमंत्री



सुखविन्दरसिंहसुक्खुःहिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मंगलवासरे संजौली-नगरस्य उत्कृष्टता-केन्द्र-सर्वकारीय-उपाधि-महाविद्यालये पूर्वविद्यार्थी-सङ्घस्य कार्यक्रमस्य अध्यक्षतां कृतवान् । अस्मिन् काले सः अवदत् यत् वर्षद्वयेन महाविद्यालये कलाखण्डः, बालिकाछात्रावासः, यानस्थगनस्थलम् च निर्मितं भविष्यति। शीघ्रमेव तस्य आधारशिला स्थास्यति इति सः अवदत्। सः कार्यक्रमस्य आयोजनकर्त्रे पूर्वविद्यार्थीसङ्घाय ५० लक्षरूप्यकाणां घोषणां कृतवान्। सुक्खुः अवदत् यत् वर्तमानस्य राज्यसर्वकारस्य कार्यकालस्य वर्षद्वयं पूर्णं कर्तुं प्रवृत्तम् अस्ति तथा च विगतवर्षद्वयेषु राज्यसर्वकारेण अनेकानि विकासात्मकानि पदानि कृतानि, येषां सकारात्मकपरिणामाः आगामिषु काले उद्भवन्ति। सः अवदत् यत् राज्यसर्वकारः राज्यस्य महाविद्यालयानाम् क्रमाङ्कनं कर्तुं विचारयति।राज्ये प्रायः १३८ महाविद्यालयाः सन्ति, तेषां क्रमाङ्कनस्य सूत्रं च सज्जीकृतम् अस्ति । सः अवदत् यत् वयं महाविद्यालयेषु सर्वेषु सर्वकारीयशिक्षणसंस्थासु च सुविधाः सुदृढाः कर्तुम् इच्छामः। राज्यसर्वकारः राज्यस्य छात्राणां कृते गुणवत्तापूर्णशिक्षाप्रदानस्य उपरि बलं ददाति, अस्य कार्यस्य कृते धनस्य अभावः नास्ति। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारेण २७ वर्षाणि यावत् राज्ये २३ सहस्राणां विधवाबालानां शिक्षाव्ययस्य वहनार्थं मुख्यमन्त्री सुखशिक्षायोजना आरब्धा। सः अवदत् यत् डॉ. वाई.एस.परमारः विद्यार्थी ऋणयोजना अपि आरब्धा अस्ति। अस्याः योजनायाः अन्तर्गतं एकप्रतिशतव्याजदरेण अध्ययनार्थं २० लक्षरूप्यकाणां यावत् ऋणं दीयते, अस्याः योजनायाः लाभः विदेशेषु अध्ययनार्थमपि प्राप्तुं शक्यते। सः अवदत् यत् अग्रिमे बजटे बहूनि परिवर्तनानि दृश्यन्ते, अस्मिन् बजटे शिक्षाक्षेत्रे विशेषं बलं भविष्यति। सः अवदत् यत् पूर्वसर्वकाराः राज्यस्य संसाधनं लुण्ठितवन्तः, परन्तु वर्तमानसर्वकारः राज्यस्य संसाधनानाम् लाभं राज्यस्य जनानां कृते प्रदातुं प्रयतते। सुक्खुः उक्तवान् यत् राज्यसर्वकारः प्राकृतिककृषेः प्रचारं करोति। राज्यसर्वकारः प्राकृतिककृष्याः उत्पादितं गोधूमं ४० रुप्यकाणां दरेन, मक्कां च ३० रुप्यकाणां दरेन क्रयणं कुर्वन् अस्ति ।तेन सह गोदुग्धं ४५ रुप्यकेण, महिषदुग्धं च ५५ रुप्यकेण प्रतिसेटकं क्रयणं क्रियते। यदि ग्रामजनानां हस्ते धनं आगच्छति तर्हि राज्ये समृद्धिः भविष्यति इति सः अवदत्। मम मीडियापरामर्शकः नरेशचौहानः मम विरुद्धं महाविद्यालयनिर्वाचनं कृतवान् आसीत्, परन्तु अहमेव विजयी अभवम्। सर्वाणि छात्रसङ्घटनानि स्वयाचनानां कृते आन्दोलनं कुर्वन्ति स्म, परन्तु सर्वेषां चिन्तनं संस्थायाः सुदृढीकरणम् आसीत् । सः छात्रान् परिश्रमं कृत्वा दृढेच्छया अग्रे गन्तुं आह्वानं कृतवान्। छात्राः मादकद्रव्यात् दूरं भवन्तु इति उक्तवान्, राज्यसर्वकारः मादकद्रव्यमाफियाविरुद्धं कठोरकार्याणि कुर्वन् अस्ति।मुख्यमन्त्री उक्तवान् यत् शिक्षायां नूतनाः पाठ्यक्रमाः आरभ्यन्ते, येन छात्राः रोजगारस्य स्वरोजगारस्य च उत्तमाः अवसराः प्राप्तुं शक्नुवन्ति। सः अवदत् यत् राज्यसर्वकारः शिक्षा, विद्युत्, जलं, अन्यासु विविधसुविधासु गुणवत्तां सुनिश्चित्य प्राथमिकताम् अददत्। अस्मिन् अवसरे हिमाचलप्रदेशस्य उच्चन्यायालयस्य न्यायाधीशः संदीपशर्मा अवदत् यत् अद्य पुनः महाविद्यालयस्य पुरातनमित्रैः सह मिलित्वा आनन्दः अभवत्, अनेकाः पुरातनाः स्मृतयः अपि नवीनाः अभवन्। सः अवदत् यत् तस्य भविष्यस्य उद्देश्याय नूतनां दिशां दातुं अस्याः संस्थायाः महत्त्वपूर्णं योगदानम् अस्ति, यस्य कृते सः संस्थायाः सदैव ऋणी भविष्यति।

## ।। श्रीरामायणकथा।।



## उत्तरकाण्डम्!(त्रिचत्वारिंशः सर्गः)रामस्य समीपं सारमेयस्य गमनम्।(तृतीयः खण्डः)

अक्लिष्टकर्मणा रामेण एवमुक्तः सः द्विजः सर्वार्थसिद्धः रामसन्निधौ अब्रवीत् हे राजन्! असमये भिक्षार्थं यदा अहं गच्छामि स्म तदा एषः शुनकः मार्गमध्ये उपविष्टः आसीत्। मया गच्छ गच्छेति भाषितं परन्तु सः मार्गस्य पार्श्वं गत्वा पुनः विषमरूपेण स्थितः अभवत्। अतः क्रोधेन क्षुधया च मया तस्मै प्रहारः प्रदत्तः। हे राजेन्द्र! माम् अपराधिनं शाधि। त्वया प्रदत्तं दण्डं यदि अहं प्राप्नुयां तर्हि नरकाद् मम भयं न भविष्यति। विप्रस्य वचः श्रुत्वा रामेण सभासदः सर्वे सम्पृष्टाः, अस्य किं कार्यं को वा दण्डः प्रदातव्यः इति केनचिद् उच्यतामिति। कारणं सम्यक् प्रणिहिते दण्डे प्रजाः रक्षिताः भवन्ति। सभायां भृगुः,अङ्गिराः, कुत्सः, महामुनिः वसिष्ठः, काश्यपः, धर्मपाठकमुख्याः, नैगमाः सचिवाश्च उपस्थिताः आसन्। अन्ये च बहवः पण्डिताः तस्यां सभायाम् उपस्थिताः आसन्। ततः राघवस्य भाषितं श्रुत्वा राजधर्मेषु निष्ठिताः तत्रत्याः सर्वे दण्डैः ब्राह्मणः अवध्यः इति रामम् अब्रुवन्। अथ ते मुनयः सर्वे तदा रामम् अब्रुवन् हे राम! विशेषेण त्वं सर्वस्य त्रैलोक्यस्य शास्ता सनातनः देवः विष्णुः। अतः यद् उचितं तदेव कुरु। तैः सर्वैः एवमुक्ते सारमेयः तदा अब्रवीत् हे राजन्! यदि त्वं तुष्टोऽसि तर्हि एतस्मै ब्राह्मणाय कौलपत्यं प्रयच्छ। हे महाराज! अस्मै कालञ्जरे कौलपत्यं दीयताम्। सारमेयस्य तद्वचनं श्रुत्वा रामेण सः ब्राह्मणः कौलपत्ये अभिषेचितः। ततः हृष्टः सः ब्राह्मणः गजम् आरुह्य अगच्छत्। एवं दृष्ट्वा स्मयमानाः रामस्य सचिवाः अब्रुवन् हे महाद्युते! एतस्मै तु वरः प्रदत्तः न तु अयं शापः! सचिवैः एवमुक्तः रामः अब्रवीत् - यूयं गतितत्त्वज्ञाः न, एतस्य कारणं सारमेयः जानाति। अथ रामेण पृष्टः सः सारमेयः एवमब्रवीत् राजन्! अहं कालञ्जरे कुलपतिः आसम्। देवद्विजातिपूजायां मम अत्यन्तं श्रद्धा आसीत्। अहं देवः, द्विजः, अतिथिः, दासः दासी इत्येतेभ्यः भोजनं दत्वा अवशिष्टं यदन्नं भवति स्म तदेव अहम् अश्नामि स्म। अपिच विनीतः शीलसम्पन्नः अहं देवद्रव्यस्य रक्षणं कुर्वन् सर्वसत्त्वहिते रतः भवामि स्म। परन्तु हे रघुनन्दन! अहमस्मिन् जन्मनि इमां घोरामधमामवस्थां गतिं प्राप्तवान्। एषः क्रोधान्वितः विप्रः त्यक्तधर्माहिते रतः। सः अविद्वान् नृशंसः क्रुद्धः चतुर्दश कुलानि पातयत्येव। तस्मात् सः सर्वासु अवस्थासु कौलपत्यं न कारयेत्। यं सपुत्रपशुबान्धवं नरकं नेतुम् इच्छेत् तं देवेषु ब्राह्मणेषु गोषु च अधिष्ठितं कुर्यात्। यः ब्रह्मस्वं देवताद्रव्यं स्त्रीणां धनं बालकधनं हरति अपिच दानरूपेण दत्तं धनं पुनः हरति सः इष्टैः सह विनश्यति। हे राघव! यः देवानां ब्राह्मणानां च धनं हरति सः सद्यः वीचिसंज्ञके घोरे नरके पतति। अपिच यः मनसा हि देवस्वं ब्रह्मस्वं च हरति सोऽपि घोरे नरके पतति। सारमेयस्य वचनं श्रुत्वा श्रीरामः अत्यन्तं विस्मितः अभवत्। श्वा अपि तदा ततः अगच्छत्। सः सारमेयः जातिमात्रोपदूषितः आसीत् चेदपि सः मनस्वी आसीत्, अतः सः वाराणसीं गत्वा अनाहारव्रतं समाचरत्।



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

# संस्कृतविश्वविद्यालये तिलकधारणस्योपरि शिक्षकस्य आपत्तिः दुर्भाग्यपूर्णा

**हिमसंस्कृतवार्ताः, 24 नवम्बर।** केन्द्रीयसंस्कृतविश्वविद्यालये बलाहरपरिसरे एकस्य हिन्दीभाषायाः शिक्षकस्य विवादः इदानीं वार्तासु वर्तते। प्राप्तविवरणानुसारं शिक्षकः छात्रैः सह हिन्दूधर्मस्य मान्यतानां विरोधे बोधयति, छात्राणाम् आरोपः अस्ति यत् शिक्षकः वदति यत् जयश्रीराम इति उद्घोषः राजनैतिकोद्घोषः अस्ति, तथा च सः सर्वदा छात्रेभ्यः तिलकधारणं कंकणबन्धनमित्यादिषु विषयेषु आपत्तिजनकान् प्रश्नान् पृच्छति। अस्मिन् विषये संज्ञानं गृहीत्वा हिमाचलसंस्कृतशिक्षकपरिषदः प्रदेशाध्यक्षेण डॉ. मनोजशैलेन स्वीया प्रतिक्रिया प्रदत्ता, तेनोक्तं यत् संस्कृतविश्वविद्यालयेषु पाठ्यमानाः विषयाः अस्माकं वैदिकसाहित्यस्य पौराणिकसाहित्यस्य च संवर्धनं कुर्वन्ति, किञ्च तत्रत्याः छात्राः तदनुगुणं कंकणधारणं तिलकधारणञ्च कुर्वन्ति, अस्मिन् विषये कस्यापि आपत्तिः दुर्भाग्यपूर्णा अस्ति। यदि छात्राः संस्कृतविश्वविद्यालयेषु एतादृशम् आचारणं कर्तुं बद्धाः भविष्यन्ति, तु अन्यत्र विश्वविद्यालयेषु का स्थितिः वर्तते। यदि अन्याः धर्मावलम्बिनः स्व-स्व धर्मानुगुणं वस्त्रादिकं धारयन्ति, तु हिन्दूधर्मावलम्बिनः किमर्थम् न धारयितुं शक्नुवन्ति, अतः एतादृशानां शिक्षकाणां मानसिकतायाः विरोधः कर्तव्यः, ये शान्तमये हिमाचले धार्मिकम् उपद्रवं जनयन्ति। एतादृशानां हिमाचलात् निष्काषनं करणीयम्, येन हिमाचलस्य विश्वविद्यालयस्य वातावरणं शान्तिपूर्णः भवेत्। ध्यातव्यमस्ति यत् संस्कृतशिक्षकपरिषदजिलाकांगड़ा इत्यस्य अध्यक्षेण डॉ. अमनदीपशर्मणापि अस्याः घटनायाः निन्दा कृता।